## 6.4.4 Institutional strategies for mobilisation of funds and the optimal utilisation of resources

**विविधसंसाधनानां सर्वाधिकसमुपयोगार्थं, वित्तराशिसङ्ग्रहार्थञ्च संस्थायाः व्यूहाः ।**

Answer:

क्षणशः कणशश्चैव विद्यामर्थं च साधयेत् इत्युक्तिं मनसि सङ्कलय्य सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः स्वस्य मानवीयसंसाधनानां भौतिकसंसाधनानां च सदुपयोगार्थं सदैव प्रयतते। विविधसंसाधनानां सदुपयोगः भवेदिति मत्वा स्वकर्मचारिषु अन्यतमान् प्रबन्धकत्वेन पर्यवेक्षकत्वेन संरक्षकत्वेन च नियोजयति । समितीनां मार्गदर्शने सर्वेषां मानवीयसंसाधनानां भौतिकसंसाधनानां च उपयोगः क्रियते। तदर्थं विशिष्टान् व्यूहान् अपि आरचयति विश्वविद्यालयपरिसरः । वित्तव्यवस्थायां विद्यमानैः साधनै सम्भावित धनव्यस्यर क्षणेव अद्य च नूतनराशेः सङ्ग्रहेणवित्तस्य द्वेधा समुचित प्रयोगो भवति। अत्रौभौ भ्रमेण लिख्येते तद्यधा –

**1. विविधसंसाधनानां सर्वाधिकोपयोगसम्बद्धाः व्यूहाः**

**1. विश्वविद्यालये सुव्यवस्थितक्रीडाङ्गणानि सन्ति।** एतेषां क्रीडाङ्गणानाम् उपयोगः न केवलं क्रीडाकलापानां निमित्तमेव अपि तु बृहत्सभादीनां सङ्घटनावसरे विविधगोष्ठीनां सञ्चालनावसरे च मुक्तसभाङ्गणरूपेणापि क्रियते। युवमहोत्सवादिषु नाट्योत्सवसन्दर्भेषु च सहस्राधिकाः जनाः सम्मिलिताः भवन्ति इत्यतः तस्मिन् सन्दर्भे क्रीडाङ्गणस्य परिपूर्णः उपयोगः जायते।

**2. सुव्यवस्थिताः ग्रन्थालयाः सन्ति।** एतेषां निर्वाहकाः ग्रन्थपालकाः न केवलं पुस्तकनिर्वहणवितरणादिकं कार्यं कुर्वन्ति अपि तु विश्वविद्यालयेन प्रकाशितानां पुस्तकानां विक्रयणार्थमपि व्यवस्थां कुर्वन्ति। विश्वविद्यालयेन अद्यावधि प्रकाशितानां वेद–शास्त्र–पुराण–इतिहास–काव्य–कोष–स्मृतिग्रन्थानां सन्दर्भग्रन्थानां, विविधशास्त्रकोषग्रन्थानां अन्याभ्योपि संस्थाभ्यः प्रकाशितानि पुस्कानि वर्तते तत्र पठित्वा छात्राः लाभं गृह्णन्ति।

**3. व्यायामशालायाः प्रयोगशालायाः गणकशालायाः अन्यासां च संसाधनानाम् उपयोगः** व्यायामशालाः प्रयोगशालाः गणकशालाः , प्राविधिकप्रयोगशालाः , सन्ति। व्यायामशालायाः सदुपयोगं छात्राः नियतं कृत्वा शारिरिकसौष्ठवं सम्पादयन्ति। प्रयोगशालाभिः छात्राः प्रत्यक्षरूपेण अधिगच्छन्ति। प्रयोज्यप्रयोजकस्थानापन्नाः छात्राः विविधप्रयोगशालानां साहाय्येन स्वयं प्रयोगं कृत्वा अधिगच्छन्ति।

**4. उपवनोद्यानपुष्पवाटिकादीनां सदुपयोगः** विश्वविद्यालयस्य परिवेषाः पुष्पोद्यानैः वाटिकाभिः उपवनैश्च सर्वदा सुशोभन्ते । अत्र विकसितानां पुष्पाणां सदुपयोगं सरस्वत्याः पूजने मालानिर्माणप्रसङ्गेषु अर्चनोत्सवादिषु क्रियते।

**5. छात्रावास–अतिथिभवन–शिक्षकावासादीनाम् उपयोगः** विश्वविद्यालये सुव्यवस्थिताः छात्रावासाः सन्ति। बालकानां बालिकानां च छात्रावासाः सर्वदा पूर्णाः एव भवन्ति। अतिथिभवनानि अपि व्यवस्थितरूपेण सज्जीकृत्य संस्थापितानि सन्ति।

**6. कक्ष्यासभाङ्गणान्तर्दौवारिकक्रीडाङ्गणादीनाम् उपयोगः** विश्वविद्यालये कक्ष्यासभाङ्गणान्तर्दौवारिकक्रीडाङ्गणादीनाम् उपयोगः नियतरूपेण जायन्ते। रिक्ते समये कक्ष्योत्तरप्रसङ्गेषु च शिक्षकाणाम् उपवेशनादिकं कर्तुमपि कक्ष्यादीनाम् उपयोगः जायते। ग्रीष्मकालिकावकाशेषु अनौपचारिकसंस्कृतशिक्षणादीनां प्रदानावसरे कक्ष्याणाम् उपयोगः जायते। अतः विश्वविद्यालयस्य भौतिकसंसाधनानि विरामदिवसेष्वपि उपयोगयोग्यानि एव भवन्ति बहुधा। वार्षिक परीक्षाषाण्मासिकपरीक्षाकार्यक्रमाः विश्वविद्यालये एवकार्यन्ते तेन विश्वविद्यालस्य धनंव्ययो न्यूनो भवति धनानांमुपयोगश्च भवति।

**2. वित्तराशिसङ्ग्रहार्थं विश्वविद्यालयस्य व्यूहाः**

विश्वविद्यालयः यद्यपि स्वस्य व्ययनिर्वहणाय पूर्णशः राज्यसर्वकारावलम्बितः वर्तते तथापि अयं व्यक्तिशः अपि वित्तराशिसङ्ग्रहार्थं नैकान् व्यूहान् रचयति । क्रमशः यथा –

**1. विश्वविद्यालयस्य प्रकाशनविक्रयकेन्द्राणि** विश्वविद्यालयस्य उपत्रिशतं प्रकाशनानि क्रयणाय उपलभ्यन्ते। पुस्तकानां विक्रयणेन अद्यावधि लक्षशः रूप्यकाणि विश्वविद्यालयेन अर्जितानि सन्ति। संस्कृतमहोत्सव – पुस्तकमेला च यत्र यत्र प्रचलन्ति तत्र बहुत्र अस्थिरविक्रयणकेन्द्राणि विश्वविद्यालयेन प्रतिष्ठाप्यन्ते । पुस्तकानां क्रेतारः उत्सुकाः भवेयुः इति मध्ये मध्ये मूल्योद्धारमपि उद्घोषयति विश्वविद्यालयः ।

**2. न्यासधनसङ्ग्रहव्यूहः** विश्वविद्यालये न्यासधनसङ्ग्रहार्थं धनदायिभ्यः दानिभ्यः अवसरः कल्पितः वर्तते। न्यासधनत्वेन लक्षशः धनं दानिभिः प्रदत्तं वर्तते। तैः प्रदत्तधनं मूलधनत्वेन कोषे एव सन्तिष्ठते।तद्धनस्य वार्षिकलाभांशमात्रस्य विनियोगः पुरस्कारसत्कारादीनां निमित्तं क्रियते । विविधमठाधीशैः सामाजिकसङ्घटनैश्च छात्राणां प्रोत्साहनाय न्यासधनं निक्षिप्तं वर्तते।

**3. प्राचीनवार्तापत्रिकाणां तदितरपदार्थानां च विक्रयणम्** विद्यमानानां प्राचीनवार्तापत्रिकाणां तदितरपदार्थानां च विक्रयणं क्वचित् सम्भवति । अनेन सहस्रशः रूप्यकाणि विश्वविद्यालयेन अर्ज्यन्ते ।

4. **अतिथिभवनभाटकधनैः च वित्तसङ्ग्रहणव्यूहः** अतिथिभवनेषु वासाय अपि नियमानुगुणं व्यवस्था अस्ति। अल्पमूल्येन सुसज्जितसुन्दरप्रकोष्ठाः सम्बद्धेभ्यः भाटकरूपेण दीयन्ते। तेनापि संस्थायै ईषदिव धनम् उपलभ्यते। शताब्दीभवनं माङ्गलिककार्या च अपि आवण्ट्यते तथोपि धनलाभो भवति।